दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**

गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णप्रतिपदा
बैशाख 19 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-189 | 1 | मई 02, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 ELECTION NEWS- पञ्चायत- नगरीय-निकाय-निर्वाचनाय पर्यवेक्षकाणां नियुक्तिः, ४१ अधिकारिभ्यः दत्तं दायित्वम्

3 राष्ट्रपतिः मुर्मू अवदत्- सैन्यसज्जतां वर्धयितुं शिमला-'आरट्रैक' निष्ठया निरन्तरं कार्यं कुर्यात्

4 पाणिनीयशोधसंस्थानस्य आयोजितः "पौष्पी पाणिनि प्रक्रियाया विश्वपरिचयं विद्वत्सम्मानं च सोल्लासं सम्पन्नः

## अमित शाहः लेह-नगरे बुद्ध-अवशेषाणां प्रदर्शिन्याः उद्घाटनं अकरोत्



बुद्धपूर्णिमावसरे केन्द्रीयगृहमन्त्री अमित शाहः लेह-नगरस्य 'जीवत्सल' स्थाने भगवतः बुद्धस्य पवित्र-अवशेषाणां प्रदर्शिन्याः उद्घाटनं कृतवान्। एते अवशेषाः ७५ वर्षेभ्यः परं लद्दाख-क्षेत्रे प्रत्यागताः सन्ति।

**ऐतिहासिकं महत्त्वम्:** एषः प्रथमः अवसरः अस्ति यत् राष्ट्रिय-संग्रहालयात् (नवदेहली) एते अवशेषाः बहिः प्रदर्शिताः।

अवधिः: एषा प्रदर्शिनी १० मई दिनाङ्क पर्यन्तं लेह-नगरे, तदनन्तरं च जांस्कर-घाटी-क्षेत्रे भविष्यति।

विशिष्टातिथिः: लद्दाखस्य उपराज्यपालः विनय कुमार सक्सेना, सांसदः मोहम्मद हनीफा इत्यादयः उपस्थिताः आसन्।

## देशे श्रद्धापूर्वकं 'बुद्धपूर्णिमा' उत्सवस्य आयोजनम्

सम्पूर्णे भारते बुद्धपूर्णिमा सोत्साहं आचर्यते। अयं दिवसः बुद्धस्य जन्म, ज्ञानोदय (निर्वाण) तथा महापरिनिर्वाणस्य प्रतीकः अस्ति। : राष्ट्रपतिः द्रौपदी मुर्मु, प्रधानमन्त्री नरेन्द्र मोदी च देशवासिभ्यः शुभकामनाः प्रदत्तवन्तः। राष्ट्रपत्या उक्तं यत् बुद्धस्य अहिंसायाः शान्तेः च सन्देशाः अद्यापि मार्गदर्शकाः सन्ति।

## नागरिकता (संशोधन) नियमाः २०२६: OCI पत्रधारकेभ्यः नवीनाः नियमाः

भारतप्रशासनेन नागरिकता नियमेषु संशोधनं कृतम्। अधुना 'भारतीय-विदेशी-नागरिक' (OCI) पत्रसम्बद्धानि सर्वाणि आवेदनानि आधिकारिक-जालपुटे (Portal) एव प्रस्तोतव्यानि भविष्यन्ति।

**महत्त्वपूर्णः नियमः:** कोऽपि अल्पवयस्कः बालकः एकास्मिन् समये भारतीय-पत्रेण सह अन्यदेशस्य यात्रा-दस्तावेजं धारयितुं न शक्नोति।

## नोएडा-अन्तर्राष्ट्रिय-विमानपत्तनम्: १५ जून दिनाङ्कात् उड्डयन-प्रचालनस्य उद्घोषणा

नोएडा-अन्तर्राष्ट्रिय-विमानपत्तनेन १५ जून २०२६ दिनाङ्कात् वाणिज्यिक-उड्डयन-प्रचालनस्य आरम्भस्य उद्घोषणा कृता। अनेन राष्ट्रिय-राजधानी-क्षेत्रे (NCR) उत्तर-भारते च यात्रिणां, विमान-सेवानां (Airlines), भार-वहनानां (Cargo) च कृते एकं नवीनं द्वारं उद्घाट्यते। प्रधानमन्त्रिणा नरेन्द्र-मोदिना विमानपत्तनस्य उद्घाटनं विहितम्। 'नागर-विमानन-सुरक्षा-ब्यूरो' इत्यस्मात् 'एयरोड्रम-सुरक्षा-कार्यक्रमाय' अनुमति-प्राप्तेः अनन्तरं सेवानां शुभारम्भः भविष्यति।

नोएडा-अन्तर्राष्ट्रिय-विमानपत्तनात् इन्डिगो (IndiGo) विमान-संस्था स्वकीयां प्रथमाम् उड्डयनं प्रचालयिष्यति। एषा उड्डयन-सेवा यात्री-सेवानां प्रारम्भं सूचयिष्यति। तदनन्तरं 'अकासा एयर' तथा 'एयर इण्डिया एक्सप्रेस' स्व-विमानानां प्रचालनं करिष्यतः।

नोएडा-अन्तर्राष्ट्रिय-विमानपत्तनं भारतस्य विश्वस्य च अन्य-नगरैः सह दिल्ली-क्षेत्रं पश्चिम-उत्तरप्रदेशं च योजयिष्यति।



एतत् विमानपत्तनं देशस्य बृहत्तमासु 'ग्रीन-फील्ड' विमानपत्तन-परियोजनासु अन्यतमं वर्तते। प्रथम-चरणे अस्य विकासः सार्वजनिक-निजी-सहभागिता (PPP) प्रतिरूपेण प्रायः ११,२०० कोटि रूप्यकाणां निवेशेन कृतः अस्ति। अस्य विमानपत्तनस्य वार्षिक-क्षमता एककोटि-विंशति-लक्षं (१.२ कोटि) यात्रिणां प्रबन्धनस्य अस्ति। पूर्णतया विकसितं सति एतत् प्रतिवर्षं सप्त-कोटि यात्रिणां प्रबन्धनं कर्तुं शक्ष्यति।

## पश्चिम-एशिया-संकटम्: ऊर्जा-आपूर्तिः नागरिक-सुरक्षा च सुनिश्चितुं सर्वकारस्य सक्रियता



भारतसर्वकारेण उक्तं यत् पश्चिम-एशिया-क्षेत्रे परिवर्तमानानां स्थितीनां मध्ये ऊर्जा-आपूर्तिं, नौवहन-अभियानं, भारतीय-नागरिकाणां सहयोगं च समाविष्य सर्वेषु क्षेत्रेषु निरन्तरतां आवश्यकीं सज्जतां च सुनिश्चितुं सक्रियतया कार्यं क्रियते।

तैल-प्राकृतिक-अनिल-मन्त्रालयेन एकास्मिन् निवेदने सूचितं यत् देशे 'एलपीजी' (LPG) इन्धनस्य सञ्चयम् तथा कृष्ण-विपणनं रोद्धु कार्याचरणं प्रचलति। ह्यः देशे २,३०० तः अधिकेषु स्थानेषु अन्वेषणं ( छापेमारी) कृतम्। एतदतिरिच्य औद्योगिक-आधारेण अन्तर्जाल-माध्यमेन एलपीजी-सिलिण्डर-पञ्जीकरणं ९८ प्रतिशतं यावत् वर्धितं, प्रायः ४९ लक्षं ८० सहस्रं गार्हस्थ्य-सिलिण्डर-यन्त्राणां आपूर्तिः च कृता। ह्यः ४१ लक्षं ६० सहस्रं एलपीजी-सिलिण्डर-यन्त्राणां पञ्जीकरणं जातम्। 'आपूर्ति-प्रमाणीकरण-कूट' (DAC) आधारित-आपूर्तिः प्रायः ९३ प्रतिशतं यावत् वर्धिता अस्ति। निवेदने अधिकमुक्तं यत् ह्यः ७९ सहस्रं पञ्च-किलोग्राम-मितं 'एफटीएल' (FTL) सिलिण्डर-यन्त्राणां आपूर्तिः कृता। वाणिज्यिक-एलपीजी इत्यस्य आवंटनं प्रायः ७० प्रतिशतं यावत् वृद्धम्। सर्वकारेण स्पष्टीकृतं यत् अस्मिन् क्षेत्रे सर्वे भारतीय-नागरिकाः सुरक्षिताः सन्ति, विगतेषु २४ घण्टासु भारतीय-ध्वज-युक्तेन केनापि पोतेन सह किमपि अप्रियं न घटितम्। पोत-परिवहन-महानिदेशालयस्य नियन्त्रण-कक्षं प्रति अधुना यावत् ८,२०० दूरभाष-कराः तथा १७ सहस्राधिकानि ई-पत्राणि प्राप्तानि। विगते २४ घण्टासु ११३ दूरभाष-कराः २९५ ई-पत्राणि च प्राप्तानि। विदेश-मन्त्रालयस्य विशेष-नियन्त्रण-कक्षद्वारा अपि भारतीय-नागरिकाणां तेषां बान्धवानां च प्रश्नानां उत्तराणि दीयन्ते। सर्वकारेण आश्वासितं यत् उड्डयन-स्थितौ सुधारः जायमानः अस्ति, क्षेत्रस्य विभिन्न-स्थानेभ्यः भारतं प्रति अतिरिक्तानि विमानानि चाल्यन्ते। तेहरान-स्थितेन भारतीय-दूतावासेन इरान-देशात् स्थल-मार्गेण बहिः निर्गन्तुं २,४९० भारतीय-नागरिकेभ्यः सौकर्यं प्रदत्तम्।

## सुभाषितम्

**धर्मेण हि जीवनं,
पावनं क्लेशरहितम्।
अनर्थपथेन गन्ता,
दुःखसागरम् अनुभवति॥**

भावार्थः- धर्म के मार्ग पर जीवन पवित्र और क्लेशरहित होता है, अनर्थ के मार्ग पर जाने वाला दुःख का सागर अनुभव करता है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
असवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## निर्वाचन आयोगस्य स्पष्टीकरणम्: EVM विषये ममता-बेनर्जी महोदयायाः आक्षेपाः निराधाराः

पश्चिम बङ्गालस्य मुख्य निर्वाचन अधिकारी मनोज-अग्रवालः उक्तवान् यत् ई.वी.एम्. (EVM) विषये कृताः आक्षेपाः आधारहीनाः सन्ति। मतगणनाकेन्द्रेषु सी.सी.टी.वी. तथा केन्द्रीय-वलैः सुदृढा सुरक्षा व्यवस्था कृता अस्ति।

## अर्थव्यवस्था: जी.एस.टी (GST) सङ्ग्रहे ऐतिहासिकं कीर्तिमानम्

एप्रिल-मासे भारतस्य जी.एस.टी सङ्ग्रहः ₹२.१० लक्षकोटि रूप्यकाणि अतिक्रान्तवान्। गतवर्षस्य तुलनायाम् अस्मिन् वर्षे ८.७% वृद्धिः अभवत्, यत् भारतीय अर्थव्यवस्थायाः सुदृढतां दर्शयति।

# HP ELECTION NEWS- पञ्चायत- नगरीय- निकाय-निर्वाचनाय पर्यवेक्षकाणां नियुक्तिः, ४१ अधिकारिभ्यः दत्तं दायित्वम्

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे पञ्चायत- नगरीय- निकाय- निर्वाचनाय सज्जीकरणानि तीव्रतराणि जातानि। राज्य- निर्वाचन- आयोगेन शुक्रवासरे पञ्चायत- नगरनिकाय- निर्वाचनप्रक्रियायाः निरीक्षणाय पर्यवेक्षकाणां नियुक्तिः कृता। आयोगानुसारं निर्वाचनेन सम्बद्धाः सर्वे अधिकारिणः पर्यवेक्षकेभ्यः तां सर्वां सहायतां प्रदास्यन्ति, यस्याः ते अभ्यर्थनाः कुर्युः, येन ते स्वतन्त्रं, निष्पक्षं, सुचारु च निर्वाचनं सुनिश्चितं कर्तुं स्वकर्तव्यानां निर्वहणं कर्तुं शक्नुयुः। राज्ये सेवारताः ४१ आईएएस (IAS), आईएफएस (IFS), एचएएस (HAS) तथा एचपीएफएस (HPFS) अधिकारिणः एतद् दायित्वं प्राप्तवन्तः। राज्य- निर्वाचन-आयुक्तः अनिल खाची महोदयः एतदर्थम् आदेशान् निर्दिष्टवान्। सर्वे पर्यवेक्षकाः तत्काले कार्यभारं स्वीकर्तुं, निर्वाचनेन सम्बद्धान् आवश्यक- अभिलेखान् निर्देशांश्च शिमलास्थित- मुख्यालयात् प्राप्तुं निर्दिष्टाः। आयोगेन पूर्वं नियुक्त- पर्यवेक्षकाणां स्थाने अधुना नूतनाः अधिकारिणः विविधेपु नगरनिगमेपु, नगरपरिषत्सु, खण्डस्तरेषु च नियुक्ताः। बिलासपुर-नगरपरिषद्, घुमारवीं- नगरपरिषद्, बिलासपुर खण्डः, घुमारवीं- खण्डाय आईएएस रोहित जम्वालस्य स्थाने अधुना एचएएस- अधिकारी दीप्तिमण्डोत्रा पर्यवेक्षिका नियुक्ता। पालमपुर- नगरनिगम- बैजनाथ- पालमपुर- खण्डयोः च रामकुमार गौतमस्य स्थाने अधुना आईएएस-अधिकारी सुनील शर्मा 'ऑब्जर्वर' नियुक्तः। कुल्लू-नगरपरिषद्, मनाली- नगरपरिषद्, भुन्तर- नगरपञ्चायत, नग्गर- कुल्लू- भुन्तर- खण्डेभ्यः च आईएएस राजीव कुमारः पर्यवेक्षकः नियुक्तः। सोलन- नगरनिगम, कण्डाघाट- नगरपञ्चायत, सोलन- कण्डाघाट- धर्मपुर- खण्डेभ्यः अश्वनीकुमारस्य स्थाने दोरजे छैरिंग पर्यवेक्षकः नियुक्तः। तथैव, धर्मशाला- नगरनिगम, काङ्गड़ा-नगरपरिषद्, धर्मशाला- काङ्गड़ा- रैत- खण्डेभ्यः च आईएएस-अधिकारी प्रदीपकुमारः पर्यवेक्षकः कृतः।

## पञ्चायत- निर्वाचनाय एते अधिकारिणः पर्यवेक्षकाः कृताः

**बिलासपुर-जनपदः**
बिलासपुर- घुमारवीं- खण्डयोः आईएएस रोहित जम्वालः।
श्रीनैनादेवी-झण्डुता-खण्डयोः एचपीएफएस सुकल्पकुमारशर्मा।

**चम्बा-जनपदः**
मैहला-चम्बा-खण्डयोः आईएफएस डी. पाटिल नितिन कुण्डलिकः।
तीसा-सलूणी-खण्डयोः आईएफएस रघुरामः।
पाङ्गी-क्षेत्राय आईएफएस राजेशकुमार शर्मा।
भटियातक्षेत्राय एचएएस विनय धीमानः।
भरमौरक्षेत्राय: एचएएस कुलविन्दरसिंहराणा।

**हमीरपुर-जनपदः**
सुजानपुर-नादौन-हमीरपुर-खण्डेभ्यः आईएएस शुभकरणसिंहः।
भोरञ्ज-बिझड़ी-बमसन-खण्डेभ्यः एचपीएफएस जगदीशगौतमः।

**सोलन-जनपदः**
कण्डाघाट-धर्मपुर-सोलन-खण्डेभ्यः आईएएस अश्वनीकुमारशर्मा।
पट्टा-नालागढ़-कुनिहार-खण्डेभ्यः एचएएस सुरेन्द्र-कुमारः।

**सिरमौर-जनपदः**
नाहन-सङ्गड़ाह-ददाहू-खण्डेभ्यः आईएएस सुमित खिमटा।
शिलाई- कमराऊ- पांवटा- साहिब- खण्डेभ्यः एचपीएफएस सञ्जय कुमारः।

**ऊना-जनपदः**
अम्ब-गगरेट-खण्डयोः एचएएस विनय मोदी।
बङ्गाणा- हरोली- ऊना- खण्डेभ्यः एचएएस सञ्जीव कुमारः।

**लाहौल-स्पीति तथा किन्नौरः**
लाहौल-खण्डाय एचएएस चरञ्जी लालः।
काजा-खण्डाय आईएफएस अशोककुमारनेगी।
किन्नौरस्य कल्पा- निचार- पूह- खण्डेभ्यः आईएफएस थर्मवीर मीना।

**काङ्गड़ा-जनपदः**
धर्मशाला-काङ्गड़ा-रेत-खण्डेभ्यः- आईएएस विनय सिंहः।
बैजनाथ-पालमपुर-खण्डयोः रामकुमारगौतमः।
इन्दौरा-नूरपुर-फतेहपुर-खण्डेभ्यः आईएफएस दिनेश शर्मा।
देहरा-परागपुर-सुरानी-नगरोटा- सूरिया-खण्डेभ्यः एचएएस अनुपमकुमारः।
नगरोटा- बगवां- सुलह- बड़ोह- खण्डेभ्यः एचपीएफएस अजयकुमारः।
लम्बागांव- भवारना- पञ्चरुखी- खण्डेभ्यः एचपीएफएस नरेश कुमारः।

**कुल्लू-जनपदः**
नग्गर-कुल्लू-भुन्तर-खण्डेभ्यः आईएएस नीरज कुमारः।
आनी-निर्मण्ड-बञ्जार-खण्डेभ्यः एचएएस ज्ञानसागरनेगी।

**मण्डी-जनपदः**
बल्ह-सदर-मण्डी-बालीचौकी- खण्डेभ्यः आईएएस विजयकुमारः।
धर्मपुर-गोपालपुर-चौन्तड़ा-द्रङ्ग- खण्डेभ्यः आईएफएस सुभाषचन्द्रपराशरः।
चुराग-करसोग-सराज-खण्डेभ्यः एचपीएफएस कमल जसवालः।
धनोटू-सुन्दरनगर-निहरी-गोहर- खण्डेभ्यः एचएएस शशिपाल सिंहः।

**शिमला-जनपदः**
नारकण्डा-ठियोग-कोटखाई-खण्डेभ्यः एचएएस चेतन खडवालः।
रामपुर-ननखड़ी-खण्डेभ्यः आईएफएस चमन लालः।
चौहारा-रोहड़ु-जुब्बल-खण्डेभ्यः एचएएस अमित गुलेरिया।
मशोबरा-बसन्तपुर-टुटु-खण्डेभ्यः एचपीएफएस सञ्जीव कुमारः।
चौपाल-कुपवी-खण्डेभ्यः एचपीएफएस अनिल कुमारः।

# जयरामः अवदत्- मुख्यमंत्रिणः सुक्खोः विवशता, 'व्यवस्था-परिवर्तनस्य' रिक्त-घोषणा च जनतायाः सम्मुखम् आगता



हिमसंस्कृतवार्ताः- काङ्गड़ा। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुमहोदयस्य नेतृत्वे काङ्ग्रेस- सर्वकारेण वारं वारं क्रियमाणः 'व्यवस्था- परिवर्तनस्य' आलापः अधुना धरातले पूर्णतया निष्प्रभावी रिक्तश्च सिद्धः भवति, यस्य प्रत्यक्षं प्रमाणं प्रदेशस्य विविधेभ्यः भागेभ्यः आगच्छन्त्यः भ्रष्टाचारस्य अव्यवस्थायाः च वार्ताः ददति। काङ्गड़ाप्रवासकाले शुक्रवासरे धर्मशालातः प्रसारिते वार्ता-वक्तव्ये पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयरामठाकुरः सर्वकारस्य कार्यप्रणाल्यां प्रहारं कुर्वन् अपृच्छत् यत् "किं एषैव सा विश्वस्तरीया स्वास्थ्य- व्यवस्था अस्ति, यस्याः स्वप्नं मुख्यमन्त्री जनेभ्यः दर्शयति स्म? यत्र चिकित्सालयानां महत्त्वपूर्णाः विभागाः तालैः पिहिताः सन्ति, निर्धनाः रोगिणश्च उपचारार्थं इतस्ततः भ्रमितुं विवशाः सन्ति।" तेन उक्तं यत् काङ्गड़ा-जनपदस्य टाण्डा-चिकित्सा- महाविद्यालयस्य हृदयविदारिका स्थितिः सर्वकारस्य पक्षाणां खण्डनाय पर्याप्ता अस्ति, यत्र हृदयरोग- सदृशस्य (कार्डियोलॉजी) संवेदनशील- विभागस्य ओपीडी पिहिता अस्ति। एतस्मात् कारणात् दूरक्षेत्रेभ्यः आगताः हृद्रोगिणः, येषु वृद्धाः महिलाः गम्भीराः रुग्णाश्च सम्मिलिताः सन्ति, विना परीक्षणम् औषधं च प्रतिगन्तुं विवशाः भवन्ति। एषा विडम्बना एव यत् एकतः सर्वकारः 'कैथलैब' इत्यत्र कोटिशः रूप्यकाणां व्ययस्य पक्षं करोति, अपरतः विशेषज्ञवैद्यानाम् अभावात् ओपीडी एव स्थगिता अस्ति, येन जनानां धनं स्वास्थ्यं च द्वयमपि सङ्कटे वर्तते।

तेन काङ्ग्रेस-दलस्य धर्मशाला-मन्थन-शिबिरस्य उपहासम् अपि कृतं यत्- "न जाने एतेषां नेता राहुलगांधी कं किं मार्गदर्शनं दत्तवान्, यत् अधुना एतेषामेव दलस्य नेतारः कथयन्ति यत् अस्मान् तु अन्तः प्रवेष्टुम् अपि न दत्तं, कार्यकर्तारश्च बहिः प्रतीक्षां कुर्वन्तः एव अतिष्ठन्।" तेन उक्तं यत् राहुलगाधिनं तस्यैव दलस्य नेतारः गम्भीरतया न स्वीकुर्वन्ति, तस्य विचारान् च जगत् दृष्टवान्। सः आगतवान्, विलासं कृत्वा च निर्गतवान्।

सर्वकारं संदेहमण्डले स्थापयन् तेन उक्तं यत् भ्रष्टाचारे अपि सर्वकारस्य स्थितिः लज्जास्पदा अस्ति, यस्य रहस्योद्घाटनं ठियोग- जल- घोटाला इत्यत्र जातः। ठियोग-उपमण्डले गतवर्षे जलसङ्कटकाले जनतायाः तृषा-निवारणाय प्रायः १.१३ कोटि-रूप्यकाणां विशालः घोटाला सम्मुखम् आगतः, यस्मिन् 'विजिलेंस' विभागेन नव- अधिकारिणां संविदाकाराणां च विरुद्धं न्यायालये चालानं प्रस्तुतम्। अस्य भ्रष्टाचारस्य स्थितिः एतावती गम्भीरा अस्ति यत् अभिलेखेषु येषां 'टैंकर'-वाहनानां सङ्ख्याः दर्शिताः, तानि वास्तवतः स्कूटर- मोटरसाइकिल- कार- सदृशानि वाहनानि आसन्। एतेन स्पष्टं भवति यत् किमपि कार्यं विना मिथ्या-देयकानि निर्माय राजकीय- कोषस्य लुण्ठनं कृतम्। आश्चर्यं तु एतत् यत् तेषु ग्रामेषु अपि जलवितरणस्य मिथ्या- देयकानि निर्मितानि यत्र मार्गः एव नास्ति।

प्रतिपक्षनेत्रा मुख्यमन्त्री आक्षिपन् उक्तं यत् यः सर्वकारः पूर्वतः चलतः संस्थाः पिहितुं व्यग्रः आसीत्, अधुना सः चिकित्सालयेषु कपाटिका- बन्धन- स्थितौ अपि मौनं धत्ते। मुख्यमन्त्रिणः विवशता 'व्यवस्था-परिवर्तनस्य' रिक्तः उद्घोषश्च अधुना जनतायाः पुरतः स्पष्टः जातः। सार्ध- वर्षत्रयस्य कार्यकाले एव राज्यं विकासस्य मापयितुं बहुवर्षाणि पृष्ठतः प्रेषितम्। तेन विश्वासः कृतः यत् पञ्चायतीराज-संस्थानां स्थानीय-निकाय-निर्वाचने च जनता काङ्ग्रेस-दलाय कठोरं प्रत्युत्तरं दास्यति, यतोहि एषः तथाकथितः व्यवस्था-परिवर्तनस्य कालः कस्मै अपि न रोचते।

# राष्ट्रपतिः मुर्मू अवदत्- सैन्यसज्जतां वर्धयितुं शिमला-'आरट्रैक' निष्ठया निरन्तरं कार्यं कुर्यात्




**हिमसंस्कृतवार्ताः- शिमला।**
भारतस्य राष्ट्रपतिः सशस्त्रबलानां च सर्वोच्च-सेनापतिः द्रौपदी-मुर्मूवर्या शुक्रवासरे राजधान्यां शिमलायां स्थितस्य मुख्यालयस्य प्रवासं कृत्वा भारतीयसेनायाः प्रशिक्षणप्रणाल्याः 'ऑपरेश्नल'-सज्जतायाः च समीक्षां कृतवती। अस्मिन् अन्तराले सा सेनां भविष्यस्य आह्वानानाम् अनुरूपं सज्जीकर्तुं विशेषं बलं दत्तवती। 'आरट्रैक' मुख्यालयं प्राप्तवत्याः राष्ट्रपतेः हिमाचलप्रदेशस्य राज्यपालः कविन्द्रगुप्तः कमाण्ड-इत्यस्य 'जीओसी-इन-सी' लेफ्टिनेण्ट जनरल देवेन्द्रशर्मा च स्वागतं कृतवन्तः। सेनायाः वरिष्ठाधिकारिणः तां कमाण्ड इत्यस्य भूमिकायाः, उपलब्धीनाम्, आधुनिक- प्रशिक्षण- पद्धतीनां च विषये अवगतं कारितवन्तः। राष्ट्रपतिः सूचिता यत् 'आरट्रैक' भारतीयसेनायै युद्धसिद्धान्तनिर्माणे, आधुनिक- संसाधनानां विकासे, प्रशिक्षणसंस्थानानां माध्यमेन च सैनिकानां दक्षतावर्धने केन्द्रीयां भूमिकां निर्वहति। 'ड्रोन' प्रशिक्षणं, नूतन-सैन्य-तन्त्राणां स्वीकरणं, 'रेड टीमिंग' सदृशाः सामरिक-अवधारणाः, अङ्गीकरण- स्वचालीकरणदिशि उक्तानां पदक्षेपाणां विषये विस्तरेण सूचना दत्ता।

## आरट्रैक-इत्यस्य भूमिका अतीव व्यापका- राष्ट्रपतिः

राष्ट्रपतिः मुर्मू एतासां प्रवृत्तीनां प्रशंसां कुर्वती अवदत् यत् परिवर्तमाने वैश्विकपरिदृश्ये सेनायाः सज्जता केवलं पारम्परिकमार्गैः सीमिता न भवितुं शक्नोति। सा 'आरट्रैक' इत्यस्य आह्वानं कृतवती यत् सा आधुनिकाः तन्त्रविद्याः (Technologies) स्वीकृत्य सेनायाः 'ऑपरेश्नल'-क्षमतां इतोपि सुदृढां कुर्यात्। 'आरट्रैक' इत्यस्य भूमिका अतीव व्यापका अस्ति, यस्यां युद्ध-अवधारणानां विकासः, संसाधनानां सृजनं, मित्रदेशानां सेनाभिः सह समन्वयः च सम्मिलितः अस्ति। एषः समादेशः 'विकसितभारतस्य' 'आत्मनिर्भररक्षा' तन्त्रस्य च निर्माणे महत्त्वपूर्णा शृङ्खला अस्ति। 'आरट्रैक' इत्यस्य अन्तर्गतं सञ्चालितानि ३२ प्रमुखाणि प्रशिक्षणसंस्थानानि भारतीयसेनायां व्यावसायिक- उत्कृष्टतां प्रति नूतनां दिशां यच्छन्ति। राष्ट्रपतिः लेफ्टिनेण्ट जनरल देवेन्द्रशर्मणा सह प्रशिक्षणसम्बद्धेषु विविधपक्षेषु विचारविमर्शं कृतवती। सा अवदत् यत् उच्चस्तरीयं प्रशिक्षणमेव राष्ट्रस्य सुरक्षां सुदृढम् आधारं ददाति। राष्ट्रपतिः 'आरट्रैक' इत्यस्य सर्वेषां पङ्क्तीनां रक्षाक्षेत्रस्य असैन्य-कर्मचारिणां च योगदानस्य प्रशंसां कृतवती तेषाम् उत्साहवर्धनं च विहितवती।

### अनाडेल-मध्ये राष्ट्रपत्यै गौरवास्पदं प्रस्थानम्-

हिमाचलप्रदेशस्य पञ्चदिवसीय-प्रवासात् परं शुक्रवासरे शिमलायाः अनाडेल-हेलीपैड स्थाने राष्ट्रपत्यै गौरवास्पदं प्रस्थानम् दत्तम्। अस्मिन् अवसरे राज्यपालः मुख्यमन्त्री सुखविन्दरसिंह सुक्खुश्च विशेषरूपेण उपस्थिताः आसन्। प्रदेशे प्रवृत्तस्य प्रतिकूल-वातावरणस्य कारणात् विगतदिनेषु मुख्यमन्त्री सुक्खुः राष्ट्रपतिं मिलितुं शिमलां प्राप्तुं न शक्तवान् आसीत्। मुख्यमन्त्री हेलीपैड स्थाने एव राष्ट्रपत्यै स्वस्य आगमनाभावे कारणानि अपि सूचितवान्। अस्मिन् अवसरे पञ्चायतीराज-ग्रामीणविकासमन्त्री अनिरुद्धसिंहः, मुख्यसचिवः सञ्जयगुप्तः, आरक्षक-महानिदेशकः अशोकतिवारी, आरक्षक-सेना-वरिष्ठाधिकारिणश्च उपस्थिताः आसन्।

### प्रतिकूल-वातावरणकारणात् 'अटल टनल' कृषि-विश्वविद्यालयं च न गन्तुं शक्तवती राष्ट्रपतिः

राष्ट्रपतिः मुर्मू वृष्टेः हिमपातस्य च कारणात् २९ अप्रैल दिनाङ्के 'अटल-टनल' (रोहताङ्ग) तथा ३० अप्रैल दिनाङ्के कृषि-विश्वविद्यालयं (पालमपुरं) न गन्तुं शक्तवती। गुरुवासरे एव राष्ट्रपति- निवास-आयोजिते 'एट होम' कार्यक्रमे अपि वृष्ट्या व्याघातः जातः।

# कृत्स्ने हि देशे सश्रद्धं सहर्षं च 'बुद्धपूर्णिमा' आचरितः




एषः दिवसः न केवलं भगवतः गौतमबुद्धस्य जन्मोत्सवस्य प्रतीकः अस्ति, अपितु अस्मिन्नेव दिने सः बिहार-राज्यस्य बोधगयायाम् 'महाबोधि'-वृक्षस्य अधः निर्वाणं प्राप्तवान्। अयं दिवसः विश्वस्य सर्वेषां बौद्धानां हिन्दूनां च कृते स्मरणीयः वर्तते।अस्मिन् अवसरे राष्ट्रपतिः द्रौपदी मुर्मू, प्रधानमन्त्री नरेन्द्र मोदी, केन्द्रीय-गृहमन्त्री अमित शाहः, लोकसभा-अध्यक्षः ओम् बिड़ला च देशवासिभ्यः शुभकामनाः प्रदत्तवन्तः।राष्ट्रपतिः द्रौपदी मुर्मूः बुद्धपूर्णिमायाः अवसरे नागरिकेभ्यः वर्धापनानि यच्छन्ती, स्वकीये सन्देशे उक्तवती यत् अयं पवित्रः दिवसः भगवतः बुद्धस्य पृथिव्यां आगमनस्य, ज्ञानोदयस्य, महापरिनिर्वाणस्य च युगान्तकारीणां घटनानां प्रतीकभूतोऽस्तीति। तस्य अनुकम्पया, अहिंसायाः, शान्तेः, ज्ञानस्य च अनन्तसन्देशाः सम्पूर्णां मानवजातीम् अविरतं मार्गदर्शन्तीति च सा अवोचत्।

# "लौकिकन्यायकोशः"

## "चन्द्रातपमलन्यायः"

चन्द्रं दृष्ट्वा कोऽपि प्रवासी जनः "अयं चन्द्रः सकलङ्कः, अतः आकर्षको नास्ति" इति वदति। प्रवासे वर्तमानस्य कृते चन्द्रस्य आकर्षणं न भवति। एवं विशिष्टकाले कस्यापि वस्तुनः निन्दा क्रियते चेत् तादृशप्रसङ्गे अस्य न्यायस्य प्रयोगो भवति।

**"सितेतर इव त्वेषः पक्षश्छिन्नं न कर्षति।**
**चन्द्रातपमलन्यायः प्रवासमलिनीकृतः।। "**

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# संस्कृतं मधुरं सदा



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

कलिप्रेरितं युगमिदं, यस्य नाम हि कलियुगमिति। परन्तु तादृशान् मनुष्यान् हि कलिः सहजतया बाधते, ये नास्तिकाः, मोहग्रस्ताः, अज्ञानिनः च स्युर्लोके। परन्तु ये तत्त्वज्ञानिनः, मननशीलाः, शुभकर्मणः कर्तारः, आस्तिकाः, सदाचारिणश्च स्युः, एतादृशान् सज्जनपुरुषान् कलिः न कदापि पीडयति। कर्मणः अधिकारः सर्वेषामस्ति, परं यः यादृशं कर्म आचरति, परिणामे तादृशं हि फलं भुङ्क्ते। जगद् अशुभमतेः कृते दुःखदम्, शुभमतेः कृते च सुखदं भवति। सुखदुःखादिकं जीवने मनुष्येण अर्जितं फलमेव, नान्यत्। "अवश्यमेव भोक्तव्यं कृतकर्म शुभाशुभम्" इति आप्तवचनमेतत् प्रमाणयति। तस्मात् मनुष्येण दुःखात् निवृत्तिप्राप्त्यर्थं सदैव शुद्धमनसा श्रीभगवन्नाम स्मरणीयं, जपनीयञ्च। यतोहि अद्यतनः युगानुकूलधर्मः हि श्रीहरिनाम वर्तते केवलम्। स्वकर्मदायित्वस्य पालनं कुर्वता मनुष्येण अहर्निशम् ईशनामस्मरणं कर्तव्यम्। नामप्रसङ्गेऽस्मिन् किञ्चिदत्र विविच्यते। परमात्मनः सर्वाणि अपि नामानि समान-प्रभावशालीनि सन्ति। शेषम् चतुर्थे पृष्ठे...

# वार्तासंवादः

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमो नमः नन्दिनि। अद्य प्रथमा वार्ता 'ओपनेआई' संस्थायाः अस्ति। तत्र नूतनानि कृत्रिम-प्रज्ञा-यन्त्राणि राक्षसानां पिशाचानां च विषये वक्तुं स्वामिभिः निषिद्धानि सन्ति।

**नन्दिनी-** एतत् तु अतीव विचित्रम्। पिशाचानां चर्चा कथं भयं जनयेत् इति न ज्ञायते। अस्तु, उत्तराखण्डराज्यस्य जोजोरा-विवाहस्य वार्ता अपि त्वया श्रुता किम्? तत्र पञ्च वध्वः एकेन संस्कारेण एकं गृहं प्रति आनीताः सन्ति।

**काव्या-** आम्, सा परम्परा विशिष्टा अस्ति। परं वृष्ट्या या हानिः अभवत् सा दुःखदा। बेङ्गलूरु-नगरे महत्या वृष्ट्या आपणस्य पञ्चसहस्र-पुस्तकानि विनष्टानि सन्ति।

**नन्दिनी-** ज्ञानस्य हानिः सर्वदा कष्टकरी एव। तथापि मानवाः दयालवः सन्ति इति सन्तोषः। अत्र कश्चन वैदेशिकः मार्गे पतितः आसीत्। सः भारतीय-नागरिकेभ्यः साहाय्यं प्राप्तवान् अस्ति। तस्य व्रणेषु निःशुल्कं पट्टिका बद्धा अस्ति।

**काव्या-** भारतीयानां सेवाभावः अतीव श्लाघनीयः अस्ति। एतादृश्यः वार्ताः मनसि शान्तिं यच्छन्ति।

# पाणिनीयशोधसंस्थानस्य आयोजितः "पौष्पी पाणिनि प्रक्रियाया विश्वपरिचयं विद्वत्सम्मानं च सोल्लासं सम्पन्नः





**हिमसंस्कृतवार्ता, डॉ. निशिकान्तपाण्डेयः**

विलासपुरः, छत्रिशगढ़ः ०१.०५.२०२६। अद्यतन-दिवसे छत्रिशगढ-राज्यस्य ख्यातिलब्धस्य पाणिनीयशोधसंस्थानस्य प्राङ्गणे एकं भव्यं दृश्यं दृष्टम्। विलासपुरे पाणिनीयशोधसंस्थानेन संस्कृतजगति छात्र-कल्याणाय तथा च छात्र-प्रतिभा-प्रोत्साहनाय 'पौषीपाणिनिप्रक्रियाविश्वपरिचयं तथा विद्वत्सम्मानम्' इति विषयमधिकृत्य अतीव उत्साहपूर्वकं कार्यक्रमं आयोजितम्। वस्तुतः अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो.श्रीनिवासवरखेडी, सारस्वतातिथिरूपेण भूतपूर्वकुलपतिः प्रो. राधावल्लभत्रिपाठी, संरक्षकः तथा विशिष्टातिथिः रूपेण श्री अमर-अग्रवालः,"पण्डितराजः" इत्युपाधिलब्धाः प्रो.विष्णुकान्तपाण्डेयः, प्रो.ब्रजभूषण-ओझा च आसन् । बुद्धपूर्णिमाया अवसरे अद्य भारतवर्षस्य सम्पूर्णराज्ये सर्वे संस्कृतपिपासुकाः तथा संस्कृतं न पठितवन्तः कदापि एतादृशाः छात्राः कर्मरताः कार्यकर्तारः च अन्तर्जालीयमाध्यमेन दृष्टवन्तः । अत एव अत्रापि भव्यरूपेण अस्माकं व्याकरणविदुषी तथा शब्दादिशास्त्रेषु निष्णाता आचार्यापुष्पादीक्षितमहोदया साहित्यरूपीसागरेऽपि स्वसामर्थ्यं स्पष्टतया प्रकटितवती । समाजस्य दर्पणतया साहित्यकृतिः प्राचीनकालादेव अङ्गीक्रियते । माताजी पारम्परिक संस्कृतविद्याक्षेत्रे अविरतनविना प्रक्रिया माध्यमेन शब्दादिशास्त्राद्यधिगमने महत् प्रयत्नं कुर्वति अस्ति । संस्कृत संसारे अस्मिन् समये भूरिशः प्रसिद्धिः प्राप्य बुद्धपूर्णिमायावसरे "पण्डितराजः" उपाधिः प्रदत्तवती समाजे प्रतिष्ठितवैयाकरणविद्वांसः प्रो.ब्रजभूषण-ओझा तथा प्रो.विष्णुकान्तपाण्डेयः महोदयेभ्यः । कुलपतिः महोदयः उक्तवान् भारतीय-संस्कृतेः व्याकरण-परम्परायाः माहात्म्यम् अस्मिन् धरातले अस्ति भवति आजीवनं तिष्ठति च इति ।अस्य कार्यक्रमस्य उद्घाटनं तथा च मार्गदर्शक-रूपेण संस्कृत-व्याकरण-विदूषीः महामहोपाध्यायाचार्याः प्रो.पुष्पादीक्षितमहोदया उपस्थित आसीत्। कार्यक्रमस्य आरम्भः कुलपति-भूतपूर्वकुलपति-आचार्य-आचार्यादीक्षित-महोदयैः सह अन्यैः विद्वद्भिः दीप-प्रज्वालनेन तथा च सरस्वती-वन्दनेन कृतः। आचार्या-दीक्षित-महोदयाः स्वकीये ओजस्विनि भाषणे मञ्चे उपस्थितान् सर्वान् अतिथीनां सम्बोधयन् उक्तवन्तः यत्— "पौष्पी पाणिनिप्रक्रियायाः तपस्यायाः कालः अस्ति। दर्शन-शास्त्रं न केवलं पुस्तकीयं ज्ञानम्, अपितु जीवनं सम्यक् रूपेण व्याकरणस्य कला अस्ति।" तथा च व्याकरणस्य ये उपदेशाः सन्ति ते अस्माभिः अनुकरणीयाः इति अनेन प्रतिपादितम्। तासां वक्तव्यं श्रुत्वा छात्राणां मनसि नवीन-ऊर्जायाः सञ्चारः जातः। ते महोदयाः छात्रान् निरन्तरं परिश्रमाय, राष्ट्र-हिताय च प्रेरयन्तः व्याकरणप्रक्रिया माध्यमेन वाक्यशुद्धतया, व्युत्पत्तिः निर्माणे, सरलमाध्यमेन सार्थकतां स्पष्टीकृतवन्तः। सहैव अस्मिन् अवसरे सर्वेभ्यः प्रेरणां प्रदत्तवान् विभागीयाध्यापकः श्रीमान् प्रो .राधावल्लभत्रिपाठी । कार्यक्रमस्य सञ्चालनं कृतवान् डॉ.अभिजितदीक्षितः।

कार्यक्रमस्य अन्ते पाणिनीयशोधसंस्थानस्य पक्षतः सर्वेभ्यः विद्वतजनेभ्यः छात्रेभ्यः आहारं जलपानं तथा च मिष्टान्नं वितरितम्।

विश्वविद्यालयस्य कुलपतीनां तथा च अन्य-विभागानां आचार्याणां मतेन एतादृशाः आयोजनाः संस्कृत-भाषायाः प्रचाराय तथा च छात्राणां सर्वाङ्गीण-विकासाय महते लाभाय भविष्यन्ति।

## मुख्यमन्त्री-विद्यालय-सुरक्षा-कार्यक्रमे आपत्प्रबन्धन-प्रशिक्षणं सम्पन्नम्



**बिहार-राज्यम्ः** बिहार-राज्यस्य 'आपत्प्रबन्धन-प्राधिकरणस्य' तत्त्वावधाने आयोजितः 'मुख्यमन्त्री-विद्यालय-सुरक्षा-आपत्प्रबन्धन' कार्यक्रमः, विदुषां विदुषीणां च गरिमामय-उपस्थितौ २९-०४-२०२६ दिनाङ्के 'गरुड-परिसरे' सम्पन्नः अभवत्।

अस्मिन् विशेष-शिबिरे मन्त्रोच्चारणं, दीपप्रज्वालनं, सामाजिक-चेतना, सेवा-भावना, नेतृत्वगुणानां विकासः च मुख्योद्देश्याः आसन्। कार्यक्रमे मुख्यातिथिरूपेण **एन.डी.आर.एफ. (NDRF)** बिहार-इकाई उपस्थिता आसीत्। कार्यक्रमस्य अध्यक्षता **डॉ. मनीष कुमार शर्मा** महोदयः अकरोत्। अस्मिन् अवसरे प्रशिक्षकः **शिव कुमारः** तथा विदुषी **अपराजिता** च उपस्थितौ आस्ताम्।

सम्बोधनकाले वक्तृभिः उक्तं यत् धरण्यां प्रकृतिकोपेन अकस्मात् आपदः आगच्छन्ति, यथा भूकम्पः, ज्वालामुखी-विस्फोटः, जलप्लावः (बाढ), अनावृष्टिः, हिमस्खलनं, करकापातः (ओले), अग्निदाहः, शीताघातः, मेघस्फोटः, विद्युत्-वज्रपातः च। एताभिः घटनाभिः न केवलं धनहानिः अपितु महती जनहानिः अपि भवति। अतः आपत्प्रबन्धनस्य ज्ञानं अनिवार्यं वर्तते।

**समारोहस्य विवरणम्ः** समापन-समारोहस्य शुभारम्भः मातुः सरस्वत्याः प्रतिमायां माल्यार्पणेन दीपप्रज्वालनेन च अभवत्। **डॉ. मुकेश पण्डितः** सरस्वती-वन्दनां स्वागत-गीतं च प्रस्तुतवान्। सः स्वकीये सम्बोधने उक्तवान् यत् विद्यालयेषु आयोजितमिदं प्रशिक्षणं आपत्काले अत्यन्तं महत्त्वपूर्णं भविष्यति। इदं शिबिरं केवलं द्विदिशात्मकं न, अपितु जीवने सामाजिक-दायित्वस्य सेवाभावस्य च सशक्तं साधनम् अस्ति।

**आपत्प्रबन्धन-प्रतियोगितायाः परिणामाः:** कार्यक्रमस्य अन्ते विभिन्नानां प्रतियोगितानां परिणामाः घोषिताः:

•**प्रथम-पुरस्कारः:** डॉ. मुकेश पण्डितः (तिर्वाहिः नेशनल +२, अधकपरिया)

•**द्वितीय-पुरस्कारः:** मुन्ना कुमारः (कोटवा), मुन्ना कुमार प्रजापतिः (रक्सौल)

•**तृतीय-पुरस्कारः:** रेखा कुमारी (मधुबन), विवेक कुमारः (नोनेया), लालबाबू प्रसादः (जैतापुर)

**निवेदकः:** मो. वारिस खानः, बिहार-आपत्प्रबन्धन-प्राधिकरणम्, बिहार।

३ पृष्ठादग्रे.. यस्य प्रेमिभक्तस्य यस्मिन् नाम्नि प्रेम स्यात् तन्नाम हि तस्य कृते विशेषलाभप्रदं भवति, तस्यैव नाम्नः महिमानं च सः लोके प्रसारयति। यस्य कृते यत् इष्टं स्यात्, यत् प्रियं स्यात्, यस्मिन् यस्य विशेषश्रद्धा एवं रुचिः स्यात्, तस्य कृते तदेव श्रेष्ठं भवति। तन्नाम्नः वचसा संकीर्तनं, मनसा जपः, एवम् अहर्निशं स्मरणं कर्तव्यम्। परमदयालुः, परमसुहृद्, परमप्रेमी, परमोदारः, नित्यः, चेतनरूपः, अनन्तः, शान्तः, सर्वशक्तिमान्, सृष्टिकर्ता, परमात्मदेवः, परमतत्त्वरूपः एकः हि, अद्वितीयः वा वर्तते, तं देवं हि श्रद्धालवः जनाः ब्रह्मा, विष्णुः, शिवः, ब्रह्म, सूर्यः, शक्तिः, गणेशः, अरिहन्ता, बुद्धः, अल्लाहः, जिहोवा, गाड इत्यादिभिः नानानामभिः उच्चारयन्ति। श्रद्धानुसारम् एतेषु किमपि नामाश्रित्य तस्य स्मरण-पूजनादिभिः जीवस्य उद्धारः कल्याणं वा सम्भवति । प्रेमपूर्वकं कृतेन जपद्वारा इष्टदेवस्य साक्षात्कारः सम्भवति। कलिसन्तरणोपनिषदि उल्लिखितः षोडश-नामात्मकः मन्त्रः सर्वेषाङ्कते महाफलदायकः वर्तते, कलियुगे सर्वैरपि तन्मन्त्रः आश्रयणीयः इति ब्रह्मदेवस्य सदुपदेशः। तन्मन्त्रः एवमस्ति-**"हरे राम हरे राम राम राम हरे हरे।**
**हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।।"**
इति।

**तस्माद् एतत् सदैव स्मरणीयं यत्-**
**"हरेर्नाम हरेर्नाम हरेर्नामैव केवलम्।**
**कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा।।"**
इति, शुभम्।